# ७. वर्णानां संवादः ।

(द्वितीयः घटकः)

अ–आ–इ–ई–उ–ऊ– ऋ– ॠ–ऌ –ए–ऐ–ओ–औ

वयं सर्वे स्वराः । ऋ, ॠ, ऌ एते अपि स्वराः एव । ऋग्वेदः, ऋषिः आदीनां शब्दानाम् अग्रस्थाने ऋ इति स्वरः ।

ं

अहम् अनुस्वारः । अहं तु स्वराणाम् आश्रयेण एव तिष्ठामि । किं मम उच्चारणं कर्तुम् इच्छसि? तर्हि वद 'अम्' 'आम्' 'इम्' इति ।

ः

अहं विसर्गः । मम अपि उच्चारणं स्वरैः सह भवति । यदि माम् वक्तुम् इच्छसि तर्हि वद, 'अः' 'इः' 'उः' इति ।

क् ख् ग् घ् ङ्

वयं व्यञ्जनानि । वयं सर्वे सहोदराः । 'क' वर्गीयाः । अस्माकम् उच्चारणं कण्ठे भवति । अतः वयं कण्ठ्याः ।

च् छ् ज् झ् ञ्

वयम् अपि सहोदराः । 'च' वर्गीयाः । अस्माकम् उच्चारणस्थानम् अस्ति तालुः । अतः वयं तालव्याः ।

ट् ठ् ड् ढ् ण्

वयं खलु 'ट' वर्गीयाः । अस्माकम् उच्चारणस्थानं वर्तते मूर्धा । अतः वयं मूर्धन्याः ।

त् थ् द् ध् न्

वयं 'त' वर्गीयाः । वयं दन्त्याः । अस्माकम् उच्चारणे जिह्वा दन्तान् स्पृशति ।

प् फ् ब् भ् म्

वयं 'प' वर्गीयाः । अस्माकम् उच्चारणे ओष्ठौ सम्मिलतः । वयं खलु ओष्ठ्याः ।

य् — अहं तालव्यः ।

र् — अहं मूर्धन्यः ।

ल् — अहं दन्त्यः ।

व् — अहं दन्तोष्ठ्यः ।

श्

यदा मम उच्चारणं भवति तदा जिह्वायाः मध्यः तालुं किञ्चित् स्पृशति । यथा शशकः इति शब्दे । अतः अहं तालव्यः ।

ष्

यदा मम उच्चारणं भवति तदा जिह्वायाः पृष्ठभागः मूर्धानं किञ्चित् स्पृशति । यथा षट्कोणः इति शब्दे । अतः अहं मूर्धन्यः ।

स्

यदा मम उच्चारणं भवति तदा जिह्वायाः अग्रं दन्तान् किञ्चित् स्पृशति । यथा समीरः इति शब्दे । अतः अहं दन्त्यः ।

ह्

अहं कण्ठ्यः ।

क्ष्

(क् + ष्) एतयोः संयोगेन अहं भवामि । अतः अहं संयुक्ताक्षरम् ।

ज्ञ्

(ज् + ञ्) एतयोः संयोगेन अहं भवामि । अतः अहमपि संयुक्ताक्षरम् ।

१. तालिकां पूरयत ।

| ह्रस्वस्वरः | दीर्घस्वरः |
|---|---|
| अ | ---- |
| --- | ई |
| ---- | ऊ |
| ऋ | ---- |

२. अधोदत्तेषु वर्गेषु योग्यं वर्णं लिखत ।

ञ्, म्, ङ्, ण्, न्

क् ख् ग् घ् .... ।

च् छ् ज् झ् .... ।

ट् ठ् ड् ढ् .... ।

त् थ् द् ध् .... ।

प् फ् ब् भ् .... ।

३. अधोदत्तान् शब्दान् पश्यत, पठत, उच्चारणभेदम् अवगच्छत ।

आशयः, विषयः, मशकः, मूषकः, सकलः, शकलः ।

४. समूहेतरं वर्णं चिनुत ।

१) क् ख् ग् ङ् ठ्    ३) ई ए उ क्ष् ओ

२) प् छ् फ् म् भ्    ४) न् ध् थ् च् द्

५. शुद्धं शब्दं चिनुत ।

१) रूचा - ऋचा  २) पृथ्वी - प्रृथ्वी  ३) ऋणम् - रुणम्

४) रूषिः- ऋषिः  ५) विष्वासः- विश्वासः

६. शब्दकोषे 'ज्ञानम्' तथा 'क्षमा' इति शब्दद्वयम् अन्विष्यत ।

७. अनुपठत-देवः, मालाः, कविः, नदीः, मतिः, भानुः, धेनूः, देवैः, नद्योः, मतेः, गौः ।

## पठत-बोधत



- पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिनीयुता ।
  पवर्गरचितामूर्तिरपवर्गप्रदायिनी ।।

मञ्जूषायां लिखितानां शब्दानाम् ऋ अक्षरेण प्रारम्भः भवति । अन्विष्यत । लिखत ।




१ भल्लूकः
२ ग्रीष्मः वसन्तः वा
३ वेदेषु एकः
४ बलीवर्दः
५ सत्यम्
६ अन्यस्मात् स्वीकृतं धनम्
७ समृद्धिः, वैभवम्

I6KECL